[२९९] अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्च वा [1]ङीष् । (म. भा. २.१४७)

उपाध्याया, उपाध्यायी ।

[३००] [2]शॄ वायुवर्णनिवृतेषु[3] । (म. भा. २.१४७)

शारो वायुः । शारो वर्णः । शारो निवृतम् ।

गौरिवाकृतनीशारः[4] प्रायेण शिशिरे कृशः (म. भा. २.१४७) ॥

## उपसर्गे रुवः । (२२/३१९२)

उपसर्गे उपपदे रौतेर्धातोर्घञ् प्रत्ययो भवति । अपोऽपवादः । संरावः । उपरावः । उपसर्गे इति किम्? [5]रवः ॥

## समि युद्रुदुवः । (२३/३१९४)

समि उपपदे यु द्रु दु इत्येतेभ्यः धातुभ्यः घञ् प्रत्ययो भवति । संयावः । संद्रावः । संदावः । समि इति किम् ? [6]प्रयवः ॥

## श्रिणीभुवोऽनुपसर्गे । (२४/३१९५)

श्रि णी भू इत्येतेभ्यो धातुभ्योऽनुपसर्गेभ्यो घञ् प्रत्ययो भवति । अजपोरपवादः । श्रायः । नायः । भावः । अनुपसर्गे इति किम् ? प्रश्रयः । प्रणयः । [7]प्रभवः । कथं प्रभावो राज्ञः[8] ? प्रकृष्टो भावः [9]इति प्रादिसमासो भविष्यति । कथं च नयो राज्ञः ? 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति [10]अच् [11]भविष्यति ॥

## वौ क्षुश्रुवः । (२५/३१९६)

[12]वावुपपदे क्षु श्रु इत्येताभ्यां धातुभ्यां घञ् प्रत्ययो भवति । अपोऽपवादः । विक्षावः । विश्रावः । वौ इति किम् ? क्षवः । श्रवः ॥

## अवोदोर्नियः । (२६/३१९७)

अव उत् इत्येतयोरुपपदयोः नयतेर्धातोः घञ् प्रत्ययो भवति[13] । अवनायः । उन्नायः । [14]कथम् उन्नयः पदार्थानाम्[15] ? 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति [16]अच् भविष्यति ॥

---

1. ङीष् प्रत्ययो भवति ह. 2. शृणातेर्वायुवर्णनिवृतेष्वपोऽपवादः ह. 3. उपसंख्यानम् इत्यधिकम् ब. 4. अकृतप्रावरणः इत्यर्थः इत्यधिकम् अ. 5. रवः नास्ति ह. 6. यवः द्रवः दवः अ.फ.ह, यवः ब. 7. प्रभवः नास्ति फ. 8. इति इत्यधिकम् फ. 9. तत् फ. 10. अच् नास्ति अ. 11. भवति क. 12. विशब्दे फ.ह. 13. अचि प्राप्ते इत्यधिकम् ह. 14. कथम् नास्ति ह. 15. इति इत्यधिकम् ह. 16. अच् नास्ति फ. ह, अङ् ब.